This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 1990 विषय ______

नाव. राजेंद्रमोक्ष (शान्तिपूर्व) M.S.S.

लेखक/लिपीकार ______

पृष्ठ 34 काळ — पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥गजेंद्रमोक्ष॥श्रीराम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगोपालकृष्णोजयति॥ जन्मेमेजयउ॰॥
किंजपन्मुच्यतेपापा किंजपन्मुखमश्नु
ते॥ दुःस्वप्ननाशनेसर्वंश्रोतुमिच्छामिमा
नद॥१॥ वैशंपायनउवाच॥ ॥युरायधर्म
राजेनपृष्टोवैस्वपितामहः॥ भीष्मोवैव्र

जिनांश्रेष्ठस्तत्वाहंकथयामिते॥२॥ देवव्र
तंमहाप्राज्ञंसर्वशास्त्रविशारदं॥ विनये
नोपसंगम्यपर्यपृच्छद्युधिष्ठिरः॥३॥
दुःस्वप्नंमनुजोघोरमवेक्ष्यभरतर्षभ॥ प्र
यतःकिंजपेज्जाप्यंविबुध्यःकिमनुस्मरेत्.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदहंश्रोतुमिच्छामिब्रूहिमेवदतांवर॥
शृणुराजन्महाबाहोवर्णयिष्यामितांगति
कं॥५॥दुःस्वप्नदर्शनेजाप्यंयद्वैनित्यंसमा
हितैः॥नमोनारायणायेतिजाप्योमंत्रः
समाहितैः॥६॥दुःस्वप्ननाशनंयस्यवांछि

तंवैनराधिप॥ किंतस्यबहुभिर्मंत्रैःकिंत
स्यबहुभिर्व्रतैः॥नमोनारायणायेतिमंत्रः
सर्वार्थसाधकः॥अत्राप्युदाहरंतीमम्मिति
हासंपुरातनं॥७॥गजेंद्रमोक्षणंपुण्यंकृ
ष्णस्याक्लिष्टकर्मणः॥सर्वरत्नमयःश्रीमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुत्रिकूटोनामपर्वतः॥१॥सुतः पर्वतराजस्य
सुमेरोर्भास्करद्युतिः॥क्षीरोदजलवीच्यग्रै
र्धूतामलशिलातलः॥२॥उत्थितः सागरंभि
त्वादेवर्षिगणसेवितः॥अप्सरोभिःपरिवृतः
श्रीमान्स्त्रीषवणाकुलः॥३॥गंधर्वैः किंनरै

र्यक्षैःसिद्धैश्चारणपन्नगैः॥मृगेंद्रैश्च गजेंद्रै
श्चवृतश्चित्रोविराजते॥४॥पुंनागैःकर्णिका
रैश्च सुबिल्वैर्दिव्यपाटलैः॥चूतनिंबकदंबैश्च
चंदनागरुचंपकैः॥५॥शालैस्तालैस्तमालै
श्चजंबूभिश्चार्जुनैस्तथा॥बकुलैःकुंदपुष्पै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चसरलैर्देवदारुभिः॥१४॥मंदारकुसुमै
श्चान्यैः पारिजातैश्चसर्वतः॥ एवंबहुवि
धैर्वृक्षैः सर्वतः समलंकृतं॥१५॥नानाधा
त्वन्वितः शृंगैः प्रस्रवद्भिः समंततः॥शोभि
तोरुचिरंप्रख्यैस्त्रिभिर्विस्तीर्णसानुभिः॥

वृतःशाखामृगैःसिद्धैर्मलिंगैश्चसदाम
दैः॥जीवजीवकसंघुष्टंचकोरशिखिनादि
तं॥१६॥तस्यैकंकांचनंशृंगंसेवतेयद्दिवा
करः॥नानापुष्पैःसमाकीर्णनानागंधैः
समाकुलं॥१७॥द्वितीयंराजतंशृंगंसेवते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यन्निशाकरः॥ पांडुरांबुदसंकाशंतुषारचय
सन्निभं॥१९॥ वज्रेंद्रनीलवैडूर्यतेजोभिर्भास
यन्नभः॥ तृतीयंब्रह्मसदनंप्रकृष्टंशृंगमु
त्तमं॥२०॥ पद्मरागसमप्रख्यंतारागणस
मन्वितं॥ नतत्कृतघ्नाःपश्यंतिननृशंसान

नास्तिकाः॥२१॥ नातप्ततपसालोकेयेचपा
पकृतोजनाः॥ नानाराधितगोविंदाःशैलं
पश्यंतितेनराः॥२२॥ तस्यसानुमतःशृंगेस
रःकांचनपंकजं॥ कारंडवसमाकीर्णराज
हंसोपशोभितं॥२३॥ मत्तभ्रमरसंघुष्टंचकोर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिखिनादितं॥ कमलोत्पलकल्हारपुंडरी
कोपशोभितं॥२४॥कुमुदैः शतपत्रैश्च कांचनैः
समलंकृतं॥ पत्रैर्मरकतप्रख्यैः पुष्पैः कांच
नसंन्निभैः॥२५॥गुल्मैः कीचकवेणूनां सम
तात्परिवारितं॥अत्यद्भुतं महास्थानं विचित्र

शिखराकुलं॥२६॥शतयोजनविस्तीर्णं दश
योजनमायतं॥ पंचयोजनमूर्ध्वं हि सरएत
त्समाणतः॥२७॥हिमखंजोद्भवं राजन्नुसु
स्वादुः स्वमृतोपमं॥त्रैलोक्याद्दृष्टपूर्वं यत्तत्त
रःसारसावृतं॥२८॥सुप्रसन्नं हितद्दृष्ट्वं देवेद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वानामपि दुर्लभं ॥ खातेन द्विगुणं प्रोक्तं सरो
यौरिव निर्मलं ॥ २९ ॥ उपहाराय देवानां सिद्ध
चर्चितपंकजे ॥ तस्मिनु सरसि दुष्टात्मा विरू
पोंतर्जलेशाय: ॥ ३० ॥ आसीद्ग्रीदी द्विजेंद्राणां
दुराधर्षो महाबल: ॥ अथ दंतोज्वलमुख: क

दाचिद्गजयूथप: ॥ ३१ ॥ गजोत्द्यनेतसंकाश:
करेणुपरिवारित: ॥ स्रवन्मदजलस्रोता:
पादचारीव पर्वत: ॥ ३२ ॥ वासयन्मदगंधेन
गिरिमैरावतोपम: ॥ गजोत्द्यंजनसंकाश:
पदाच्चलितलोचन: ॥ ३३ ॥ तृषित: पातुका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोंभोवतीर्णस्तन्महत्सरः॥ पिबतस्तस्यत
तोयंयाहस्तंसमुपद्यत॥२४॥ सुलीनःपंक
जवनेयूथमध्यगतःकरी॥ गृहीतस्तेनरौद्रे
णयाहेणातिबलीयसा॥२५॥ गजआकर्ष
तेतीरंयाहआकर्षतेजलं॥ पश्यंतीनांक

रेणूनांक्रोशंतीनांचदारुणं॥२६॥ नियते
पंकजवनेयूथमध्यगतःकरी॥ तयोर्युद्धम
भूद्धोरंदिव्यवर्षसहस्रकं॥२७॥ वारुणैःसं
युतःपाशैर्निःप्रयत्नगतिःकृतः॥ वेष्ट्यमा
नःसुघोरैस्तुपाशैर्नागोदृढैस्तथा॥२८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विस्फूर्यचमहाशक्तिर्विक्रुश्यचमहारवा
न्॥ व्यथितःतःसन्निरुत्साहोगृहीतोघो
रकर्मणा॥३९॥परमापदमापदमापन्नोम
नसाचिंतयेद्धरिं॥ सतुनागवरःश्रीमान्
नारायणपरायणः॥४०॥ तमेवशरणंदेवं

गतःसर्वात्मनातदा॥ एकाग्र्योनिगृहीतात्म
त्माविशुद्धेनांतरात्मना॥४१॥ नैकजन्मांत
राभ्यासाद्भक्तिमान्गरुडध्वजे॥ नान्यंदेवं
महादेवात्पूजयामासकेशवात्॥४२॥ दि
ग्बाहुंस्वर्गमूर्धानंभूपादंगगनोदरं॥ आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वियचंद्रनयनेअनंतंविश्वतोमुखं॥४३॥अ
मृतात्मनवाभ्रामंशंखचक्रगदाधरं॥सद्व
स्त्रशुभनामानमादिदेवमजंविभुं॥४४॥प्र
गृह्यपुष्करायेणकांचनंकमलोत्तमं॥निवे
द्यमनसाध्यात्वापूजांकृत्वाजनार्दने॥४५॥

अपहिमोक्षमन्विछन्गजस्तोत्रमुदीर
येत्॥गजेंद्र उवाच॥नमोमूलप्रकृतये
अजितायमहात्मने॥अनाश्रितायदेवाय
निस्पृहायनमोनमः॥४६॥नमआद्यायबी
जायआर्षयायप्रवर्तिने॥अनंतरायचैक्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यअव्यक्तायनमोनमः॥४७॥नमोगुह्याय
गूढायगुणायगुणधर्मिणे॥अतर्क्यायाप्रमे
यायअतुलायनमोनमः॥४८॥नमःशिवा
यशांतायनिश्चिताययशस्विनेसनातना
यपूर्णायपुराणायन०॥४९॥नमोजगत्प्रति

ष्ठायगोविंदायनमोनमः॥नमोदेवादिदेवा
यस्वभावायनमोनमः॥५०॥नमोस्तुपद्म
नाभायसांख्ययोगोद्भवायच॥विश्वेश्वराय
देवायशिवायह०॥५१॥नमोस्तुतस्मैदेवा
यनिर्गुणायमहात्मने॥नारायणायदेवाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विश्वानांपरमात्मने॥५२॥नमोनमःकारणकार
णायनारायणायामिताविक्रमाय॥श्रीशार्ङ्ग
चक्रासिगदादरायनमोस्तुतस्मैपुरुषोत्तमा
य॥५३॥गुह्यायवेदनिलयायमहोदरायसिं
हायदैत्यनिधनायचतुर्भुजाय॥ब्रह्मेंद्ररुद्र

मुनिचारणसंस्तुतायदेवोत्तमायविरजाय
नमोच्युताय॥५४॥नागेंद्रभोगशयनासन
सुप्रियायगोक्षीरहेमशुकनीलघनोपमाय
पीतांबरायमधुकैटभनाशनायविश्वायचा
रुमुकुटायनमोवराय॥५५॥नाभिप्रजातक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मलासनसंस्तुतायक्षीरोदकार्णवनिकेतय
शोदराय॥ नानाविचित्रविकटांगदभूषणा
ययोगेश्वरायनमोवराय॥५६॥ भक्तिप्रिया
यवरदीप्तिसुदर्शनायफुल्लारविंदविपुला्य
तलोचनाय॥ देवेशविघ्नशमनोद्यतपौरुषा

ययोगेश्वरायविरजायनमोच्युताय॥ ना
रायणायनरलोकपरायणायकालायका
लायकालकमलायतलोचनाय॥ रामाय
रावणविनाशनकारणायवीरायधीरतिल
कायघनोपमाय॥५७॥ पद्मासनायमणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुंडलभूषणाय कंसांतकाय शिशुपालविनाशनाय ॥ गोवर्द्धनाय सुरशत्रुनिकंदनाय दामोदराय विबुधाय नमो वराय ॥ ५९ ॥ ब्रह्मायनाय त्रिदशायनाय लोकायनाया त्महितायनाय ॥ नारायणायार्तिविनाश

नाय महावराहाय नमस्करोमि ॥ ६० ॥ नारायणाय सुरलोकपरायणाय कालाय विश्वविलयोद्भवसंयमाय ॥ अज्ञाननाशनकृते भुवमागताय व्यासाय लोकगुरवे नमदीश्वराय ॥ ६१ ॥ नमस्तस्मै वराहाय लीलयोद्ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रलेमहीं॥ खुरमध्येगतोयस्यमेरुः खणरख
णायते॥६२॥ कूटस्थमव्यक्तमचिंत्यरूपंना
रायणंकारणमादिदेवं॥ युगांतशेषंपुरुषं
पुराणंतंवासुदेवंशरणंप्रपद्ये॥६३॥ अद्द
श्यमच्छेद्यमनंतमव्ययंमहर्षयोब्रह्मम॥

यंसनातनंवदंतियेवैपुरुषंपुरातनंतंवा॥
उत्तिष्ठतस्तस्यजलार्द्रकुक्षेर्महावराहस्य
महींविगृह्य॥ विधुन्वतोवेदमयंशरीरंलो
कांतरस्थायमुनयोवदंति॥६४॥ योगेश्वरं
चारुविचित्रमौलिंज्ञेयंसमस्तैःप्रकृतेःपुर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तात्॥ क्षेत्रज्ञमात्मप्रभवंवरेण्यंतंवासुदे०
६६॥ कार्यंक्रियाकारणमप्रमेयंह्रिरण्यबाहुं
वरपद्मनाभं॥ महाबलंदेवनिधिंसुरोत्तमंतं
वासुदेवंशरणंप्रपद्ये॥६७॥ किरीटकेयूरम
हार्हनिष्कैरत्न्यंतमालिंगितसर्वगात्रं॥पीतांब

रंकांचनभक्तिचित्रंमालाधरंकेशवमभ्युमै
पि॥६८॥ लोकत्रयायचैकायपरतः परमात्म
ने॥ नमः सहस्रशिरसे अनंतायनमोनमः॥
भवोद्भवंवेदविदांवरिष्ठं आदित्ययोगात्मकं
सांख्यविदांवरिष्ठं॥आदित्यचंद्राग्निवसुप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावंप्रभुंप्रपद्येच्युतमात्मवंतं॥७०॥यदक्ष
रंब्रह्मवदंतिसर्वगंनिशाम्यमृत्यार्हिमुखा
त्प्रमुच्यते॥तमीश्वरंयुक्तमनुत्तमैर्गुणैः सना
तनंलोकगुरुंनमामितं॥७१॥श्रीवत्सांकंज
गद्वीजंवेदगुह्यमनुत्तमं॥प्रपद्येसूक्ष्ममच

लंवरेण्यमभयप्रदं॥७२॥प्रभवंसर्वभूता
नांनिर्गुणंपरमेश्वरं॥प्रपद्येमुक्तसंगानांयो
गिनांपरमांगतिं॥७३॥भगवंतंगुणाध्यक्ष
मक्षरंपरमंपदं॥शरण्यंशरणंभक्त्याप्रपद्ये
भक्तवत्सलं॥७४॥त्रिविक्रमंत्रिलोकेशंलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कानांप्रपितामहं॥ योगात्मानंमहात्मानंप्र
पद्येहंजनार्दनं॥७५॥ आदिदेवमजंविष्णुंव्य
क्ताव्यक्तंसनातनं॥ नारायणमणीयांसंप्रप
द्येब्राह्मणप्रियं॥७६॥ अकूपारायदेवायन
मः सर्वमहात्मने॥ प्रपद्येदेवदेवेशमणीयां

समणोः सदा॥७७॥ एकायलोकतंत्रायपर
तः परमात्मने॥ नमः सहस्रशिरसे अनंताय
नमोनमः॥७८॥ त्वमेवशरणंदेवमृषयोवेद
पारगाः॥ कीर्तयंतिचयंसर्वेब्रह्मादीनांप
रायणं॥७९॥ नमस्तेपुंडरीकाक्षभक्तानामभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यंकरं॥ सुब्रह्मण्यनमस्तेस्तु त्राहिमांशरणा
गतं॥ ६०॥ तावद्भवतुमेदुःखंचिंतासंसारसा
गरे यावत्कमलपत्राक्षंनस्मरामिजनार्दनं
॥ ६१॥ भीष्मउवाच॥ भक्तिंतस्याशुसंचिंत्यना
गस्यामोघसंस्तवान्॥ प्रीतिमानभवद्राजन्

सद्यश्चक्रगदाधरः॥६२॥ आरुह्यगरुडंवि
ष्णुराजगामसुरोत्तमः॥ सान्निध्यंकल्पया
मासतस्मिन्सरसिलोकधृक्॥ ६३॥ याद
ग्रस्तगजंक्षिप्रंसंगृह्यसलिलान्नायात्॥
उज्जहाराप्रमेयात्मातरसामधुसूदनः॥६४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जलस्यंदारयामासयाहंचक्रेणमाधवः॥मो
चयामासनागेंद्रंपाशेभ्यःशरणागतं॥२५॥
इदमप्यपरंगुह्यंजाराजन्पुण्यतमंशृणु
सहिदेवलशापेनहूहूगंधर्वसत्तमः॥२६॥
ग्राहत्वमयतःकृष्णाद्वधंप्राप्यदिवंगतः॥

ग्राहाश्वगजतांप्राप्यश्रीकृष्णादगमद्दिवं॥
आपद्विमुक्तौयुगपद्गजोगंधर्वएवच॥युधि०
कथंशापोभवत्तावद्गंधर्वस्यमहात्मनः॥२७॥
एतदिच्छाम्यहंश्रोतुंविस्तरेणपितामह॥
भीष्मउवाच॥ ॥यथातौशापितौतेनदेवले

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमद्धात्मना॥९॥ हाहाहूहूरितिख्यातौ
गीतवाद्यविशारदौ॥ उर्वसीमेनकारंभाल
थान्येचाप्सरोगणाः॥१०॥ नाकस्यपुरतोरा
जन्नृत्यंतेताःसुमध्यमाः॥ ततस्तौगायमा
नौतुगंधर्वौराजसद्मनि॥११॥ अन्योन्यंकुर्व

तुस्पर्द्धांशक्रस्यपुरतस्थितौ॥ आवयोरुभ
योर्मध्येयःश्रेष्ठोगीतवाद्ययोः॥१२॥ संवदस्व
सुरश्रेष्ठज्ञात्वागीतस्यलक्षणं॥ गंधर्वयोर्वच
श्रुत्वाप्रत्युवाचशतक्रतुः॥१३॥ युवयोर्गीतवा
द्येषुविशेषोनोपलभ्यते॥ एकएवमुनिश्रेष्ठ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवलोनामनामतः॥ ततस्तुतौत्राक्रवचोनि
शम्यप्रणम्यराजनुसिरसासुरोत्तमं॥ गतौ
सुत्दृष्टौजयकांक्षिणौतौयत्राश्रमेतिष्ठति
सद्विजाग्र्यः॥ ततोदृष्ट्वामुनिश्रेष्ठंदेवलंसंशि
तव्रतं॥ अभिवंद्यमहात्मानमूचतुःपार्श्वसंस्थि

तौ॥९६॥ शक्रेणप्रेषितौदेवत्वत्समीपेहद्विजो
त्तम॥ एकस्यनौजयंदेह्यियत्तेमनसिवर्तते
पृथक्कुचिरंतौगायंतौरुचिरंमधुराक्षरं॥ न
किंचिद्वदतेवाक्यंमुनिर्मौनस्यधारणात्॥९७॥
शृण्वन्नपियदातेषांनकिंचिद्वदतेमुनिः॥ त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ग०॥ ॥मो०॥

तदातौकुपितौतस्यदेवलस्यमहात्मनः॥९९॥
ऊचतुस्तौस्तदावाक्यंगंधर्वौकालनोदितौ॥
मूढोयंनाभिजानातिनिश्चयंहूहूगीतयोः॥
निशाम्यतद्वचस्तेषांगंधर्वाणांमदान्वितं॥क्रो
धादुत्थायविप्रेंद्रइदंवचनमब्रवीत्॥१०१॥छ॥

एषहूहूदुरात्मातुयाहत्वंयातुमूढधीः॥त्वमे
वगजराजस्तुभवत्वंगिरिगह्वरे॥२॥एवंशा
पौददौक्रुद्धोदेवलःसुमहातपः॥ततस्तौशा
पितौतेनदेवलेनमहात्मना॥३॥प्रणम्यत्रि
रसाविप्रंगंधर्वाविदमूचतुः॥भूमंडलंततो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्यांवाप्रसादंकुरुसव्रत॥ निश्चयंवदविप्रें
द्रयेनशापाद्विमुच्यते॥ ततस्तौपुरतस्थि
त्वाप्रभोःशापभयार्दितौ॥ ५॥ प्रत्युवाचमु
निश्रेष्ठोगंधर्वाणांभयापहं॥ मेरुपृष्ठेसरोर
म्यंबहुवृक्षा कुलं॥ ६॥ नानापक्षिनि

नादाढ्यंद्वितीयइवसागरः॥ तस्मिन्सरो
वरेरम्येयादोनित्यंभविष्यसि॥ जांत्वषा
त्तैस्तत्रमातंगोगमिष्यतिनगोत्त ॥ तयो
र्मध्येमहद्युद्धंभविष्यतिसुदारुणं॥ ८॥ ग्रा
हेणाकृष्यमाणस्तुगजस्तोत्रंकरिष्यति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्देवदेवदेवेशास्तुष्यतेनात्रसंशयः॥९॥
ततोनारायणःप्रीतःशापात्त्वांमोक्षयि
ष्यति॥भीष्मउवाच॥ छ॥ सहिदेवर्षिणाशा
पेनहूहुर्गंधर्वसत्तमः॥१०॥ ग्राहत्वम
गमत्सोथवधंप्राप्यदिवंगतः॥आपाद्वि

मुक्तोयुगपद्गजोगंधर्वएवच॥ गजोपि
भक्ततांयातःश्रीकृष्णेणविमोक्षितः॥
तस्माच्छापाद्विनिर्मुक्तोभक्तेष्वधिकृ॥
तोभवत्॥ तौचस्वस्वंवपुर्प्राप्यप्रणिप
त्यजनार्दनं॥१२॥ गजोगंधर्वराजश्चप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रांनिर्वृत्तिमागतौ॥ प्रीतिमान्पुंडरीका
क्षः शरणागतवत्सलः॥२३॥ अभवद्देव
देवशस्ताभ्यांचैवमपूजितः॥ इदमुच्चै
र्महाबाहुर्महादेवः सुभाषितं॥२४॥ भ
जंतगजराजानमुवाचमधुसूदनः॥ ॥

श्रीभगवानुवाच॥ योमांत्वांचसरश्चैवग्रा
हस्यचविदारणं॥ गुल्मकीचकवेणूनां
तंचशैलवरंतथा॥२५॥ अश्वत्थंभास्करं
गंगांनैमिषारण्यमेवच॥ येस्मरिष्यंति
मनुजाः प्रयताः स्थिरबुद्धयः॥२६॥ दुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वप्नोनदृश्यतेतेषांसुखमक्ष्वभविष्यति
अनिरुद्धंगजेंग्राहंवासुदेवंमहाद्युतिं
१७॥संकर्षणंमहात्मानंप्रद्युम्नंहितथै
वच॥मत्स्यंकूर्मंवराहंचवामनंताक्ष्यमे
वच॥१८॥नारसिंहंचनागेंद्रंसृष्टिसंहा

रकारकं॥विश्वरूपंहृषीकेशंगोविंदंम
धुसूदनं॥सहस्राक्षंचतुर्बाहुंमुरारिंग
रुडध्वजं॥त्रिदशैर्वंदितंदेवंदृढभक्ति
मनुत्तमं॥१९॥वैकुंठंदुष्टदमनंमुक्तिदं
माधवंविभुं॥एतानिप्रातरुत्थायसंस्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रंतिचयेजनाः॥२१॥सर्वपापैः प्रमुच्यंते
विष्णुलोकमवाप्नुयुः॥भीष्मउवाच एवमु
क्त्वामहाराजगजेंद्रंमधुसूदनः॥स्पर्श
यामासहस्तेनगजंगंधर्वमेवच॥तौचस्पृ
ष्टौततःसद्योदिव्यमाल्यांबरावुभौ॥२३॥

तमेवमनसाप्राप्यजग्मतुस्त्रिदशालयं
ततोदिव्यवपुर्भूत्वाहस्तिराट्परमंपदं॥२४॥
गच्छतिस्ममहाबाहोनारायणपरायणः
ततोनारायणःश्रीमान्मोचयित्वागजो
त्तमं॥२५॥ऋषिभिस्तूयमानोग्र्यैर्वेदस्तुत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परासरैः।। ततः सभगवान्विष्णुर्दुर्विज्ञेयग
तिःप्रभुः।।२६।। शंखचक्रगदापाणिरंतर्द्धा
नंसमाविशात्।। वैशंपायनउवाच।।गजेंद्र
मोक्षणंराजाकुंतीपुत्रोयुधिष्ठिरः।।२७।।पि
तामहमहाभागात्सत्यव्रतपरायणात्।।

भ्रातृभिःसहितःश्रुत्वा ब्राह्मणैर्वेदपार
गैः।। पूजयामासदेवेशंपार्श्वस्थंमधुसूदनं
विस्मयोत्फुल्लनयनःस्मृत्वानागस्यमोक्षणं
ऋषयश्चमहाभागाःसर्वेप्रांजलयस्थि
ताः।।अजंवरेण्यंवरपद्मनाभंमहाबलंदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वनिधिंसुरोत्तमं॥ तंवेदगुह्यंपुरुषंपुराणं
ववंदिरेवेदविदांवरिष्ठं॥२०॥ जितंतेपुंडरीका
क्षनमस्तेविश्वभावन॥ नमस्तेस्तुहृषीकेश
महापुरुषपूर्वज॥२१॥ आद्यंपुरुषमीशा
नंपुरुहूतंपुरुष्टुतं॥ ऋतमेकाक्षरंब्रह्मव्य

क्ताव्यक्तंसनातनं॥२२॥ असच्चसच्चयद्विश्वं
नित्यंसदसदात्मकं॥ परंपराणांकर्त्तारंपु
राणंपरमव्ययं॥२३॥ मांगल्यंमंगलंविष्णुं
वरेण्यंवरदंशुचिं॥ अस्तुवंस्तेहृषीकेशंचरा
चरगुरुंहरिं॥२४॥ एतत्पुण्यंमहाबाहो

जनानांपुण्यकर्मणां॥दुःस्वप्नदर्शनेघोरे
श्रुत्वापापैःप्रमुच्यते॥३५॥तस्मात्वंहिमहा
बाहोप्रपद्येशरणंहरिं॥विमुक्तःसर्वपापे
भ्यःप्राप्स्यसेपरमंपदं॥३६॥यदामहाग्राह
गृहीतमातुरंस्तुष्यन्तंतुप्रववेनमहागजं॥

विमोक्षयामासजनार्दनोद्विपंस्मरामिदुः
स्वप्नविनाशनंहरिं॥३७॥परंपुराणंपरमंप
वित्रंपरेशमीशंसुरलोकनाथं॥सुरासुरैर
र्चितपादपद्मंसनातनंलोकगुरुंनमामि॥३८
वरगजस्मरणाद्विमुक्तिहेतोःपुरुषवरस्तुति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिव्यदेहगीतं॥सततमभिपठंतिये तुतेषां
ममरगणांतिककल्मषापहंस्यात्॥३९॥स्म
रणादेवकृष्णास्यपापसंघातपंजरः॥शतधा
भेदमाप्नोतिगिरिर्वज्रहतोयथा॥४०॥नमो
ब्रह्मण्यदेवायगोब्राह्मणहितायच॥जग

द्धितायकृष्णायगोविंदायनमोनमः॥४१॥
आर्त्ताविषण्णाःशिथिलाश्चभीताघोरेषु
चव्याधिषुवर्त्तमानाः॥संकीर्त्यनारायणशा
ब्दमात्रंविमुक्तदुःखासुखिनोभवंति॥४२॥
वेदेरामायणेचैवपुराणेभारतेतथा॥आदौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चांतेचमध्येचविष्णुः सर्वत्रगीयते॥ एकोपि
कृष्णस्यकृतः प्रणामोदशाश्वमेधावभृथेन
तुल्यः॥ दशाश्वमेधीपुनरेतिजन्मकृष्णप्रणा
मीनपुनर्भवाय॥४४॥ सर्वरत्नमयोमेरुः सर्व
तेजोमयंनभः॥ सर्वतीर्थमयीगंगासर्वदेव

मयोहरिः॥४५॥ आकाशात्पतितंतोयंयथा
गच्छतिसागरं॥ सर्वदेवनमस्कारंकेशवंप्र
तिगच्छति॥४६॥ इतिशांतिपर्वणिमोक्ष
धर्मेगजेंद्रमोक्षःसमाप्तः॥ श्रीगोपालकृष्ण

॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ग॰ ॥

॥गो॰ ॥

॥३४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=20.07.19 11:54
,TRANSFERRED=2019/07/20 at 12:07:08
,PAGES=37
,TYPE=STD
,NAME=S0001043
,Book Name=M-1990-GAJENDRAMOKSH SHANTIPURV MSS
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection